# গাযত্রী বন্দনা

{॥ গাযত্রী বন্দনা ॥}

ওঁকাররূপা ত্রিপদা ত্রযী চ ত্রিদেববন্দ্যা ত্রিদিবাধিদেবী ।
ত্রিলোককর্ত্রী ত্রিতযস্য ভর্ত্রী ত্রৈকালিকী সঙ্কলনাবিধাত্রী ॥ ১॥

ত্রৈগুণ্যভেদাত্ ত্রিবিধস্বরূপা ত্রৈবিধ্যযুক্তস্য ফলস্য দাত্রী ।
তথাপবর্গস্য বিধাযিনী ত্বং দযার্দ্রদৃক্কোণবিলোকনেন ॥ ২॥

ত্বং বাঙ্মযী বিশ্ববদান্যমূর্তির্বিশ্বস্বরূপাপি হি বিশ্বগর্ভা ।
তত্ত্বাত্মিকা তত্ত্বপরাৎপরা চ দৃক্তারিকা তারকশঙ্করস্য ॥ ৩॥

বিশ্বাত্মিকে বিশ্ববিলাসভূতে বিশ্বাশ্রযে বিশ্ববিকাশধামে ।
বিভূত্যধিষ্ঠাত্রি বিভূতিদাত্রি পদে ত্বদীযে প্রণতির্মদীযা ॥ ৪॥

ভোগস্য ভোক্ত্রী করণস্য কর্ত্রী ধাত্বাব্যযপ্রত্যযলিঙ্গশূন্যা ।
জ্ঞেযা ন বেদৈর্ন পুরাণভেদৈর্ধ্যেযা ধিযা ধারণযাদিশক্তিঃ ॥ ৫॥

নিত্যা সদা সর্বগতাঽপ্যলক্ষ্যা বিষ্ণোর্বিধেঃ শঙ্করতোঽপ্যভিন্না ।
শক্তিস্বরূপা জগতোঽস্য শক্তির্জ্ঞাতুং ন শক্যা করণাদিভিস্ত্বম্ ॥ ৬॥

ত্যক্তস্ত্বযাত্যন্তনিরস্তবুদ্ধির্নরো ভবেদ্ বৈভবভাগ্যহীনঃ ।

হিমালযাদপ্যধিকোঽত্রতোঽপি জনৈস্সমস্তৈরপি লঙ্ঘনীযঃ ॥ ৭॥

শিবে হরৌ ব্রহ্মণি ভানুচন্দ্রযোশ্চরাচরে গোচরকেঽপ্যগোচরে ।

সূক্ষ্মাতিসূক্ষ্মে মহতো মহত্তমে কলা ত্বদীযা বিমলা বিরাজতে ॥ ৮॥

সুধামরন্দং তব পাদপদ্মং স্বে মানসে ধারণযা নিধায ।

বুদ্ধির্মিলিন্দীভবতান্মদীযা নাতঃ পরং দেবি বরং সমীহে ॥ ৯॥

দীনেষু হীনেষু গতাদরেষু স্বাভাবিকী তে করুণা প্রসিদ্ধা ।

অতঃ শরণ্যে শরণং প্রপন্নং গৃহাণ মাতঃ প্রণযাঞ্জলিং মে ॥ ১০॥

॥ ইতি গাযত্রীবন্দনা সমাপ্তা ॥

Encoded and proofread by Ramgopal Bhimavarapu bhimavarapu2014 at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Gayatri Vandana Lyrics in Bengali PDF
% File name : gAyatrIvandanA.itx
% Category :
% Location : doc_devii

% Author :
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Ramgopal Bhimavarapu bhimavarapu2014 at gmail.com
% Proofread by : Ramgopal Bhimavarapu bhimavarapu2014 at gmail.com
% Translated by :
% Description-comments :
% Source : Gayatri Mahavigyan
% Acknowledge-Permission:
% Latest update : May 29, 2015
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 11, 2015 ] at Stotram Website